२१

आलंकारिकपरिचयः-२

प्रस्तावना

कवयः साहित्यस्य निर्माणाय प्रयतन्ते। परन्तु अज्ञातपूर्वतया एव साहित्ये अलङ्काराणाम् आत्मप्रकाशो भवति। यथा विश्वस्य प्राचीनतमऋग्संहितायाम् ऋषयः अज्ञातपूर्वतया एव अलङ्काराणां प्रयोगं कृतवन्तः।

ऋग्वेदे उपमा, रूपकम्, अतिशयोक्तिः, अनुप्रासः इत्यादीनाम् अलङ्काराणां प्रयोगः अस्ति। अग्निपुराणे काव्यविभागः, काव्यस्य रीतयः, काव्यस्य गुणाः, इति एते विषयाः चर्चिताः सन्ति। इतःपरं साहित्यशास्त्रस्य विवेचनाय अलङ्कारशास्त्रम् अपि समागतम्। प्राचीनाः आलङ्कारिकाः काव्यविषये बहूनि मतानि प्रदत्तवन्तः। काव्ये कः प्राणभूतः भवति इति विषयं स्वीकृत्य आलङ्कारिकाणां मतसाम्यं मतवैसाम्यं च उभयधा दृश्यते। ध्वनिकारः आनन्दवर्धनः स्वकीये ध्वन्यालोकग्रन्थे ध्वनिः एव प्राणभूतः इति मतं दर्शितवान्। अत्र एव काव्ये ध्वनिविरोधिनां मतम् उपस्थाप्य खण्डितवान्। ततः परं मम्मटाचार्यादयः काव्यप्रकाशग्रन्थं लिखितवन्तः। तत्र काव्यलक्षणं प्राह- "तददोषौ शब्दार्थौ सगुणौ सावनलङ्कृती पुनः क्वापि" इति। इदम् एव काव्यलक्षणं खण्डयित्वा विश्वनाथः साहित्यदर्पणग्रन्थं लिखितवान्। तत्र वाक्यलक्षणं प्राह - "काव्यं रसात्मकं वाक्यम् "इति। ततःपरं जगन्नाथः वाक्यलक्षणम् इदम् खण्डयित्वा रसगङ्गाधरग्रन्थं लिखितवान्। तत्र वाक्यलक्षणं प्राह - "रमणीयार्थप्रतिपादकः शब्दः काव्यम्" इति। एवम् आलङ्कारिकाः काव्यविषये स्वस्वसिद्धान्तं प्रतिपादितवन्तः।

भारतीयपरम्परायां विद्वांसः स्वकीये ग्रन्थे न कदापि स्वकीयपरिचयादिकं स्थापयन्ति। तस्मात् एतादृशानां विदुषां देशकालादिविचारः तु दुष्करः भवति। परन्तु ध्वनिकारस्य मतं मम्मटः स्वीकृतवान्, मम्मटस्य मतम् खण्डितवान् विश्वनाथः, विश्वनाथस्य मतं जगन्नाथः खण्डितवान्। एतेन आनन्दवर्धनमम्मटविश्वनाथादीनां मध्ये पौर्वापर्यं ज्ञातुं शक्यते। कदाचित् ग्रन्थे तत्तत्कालवर्त्तिनः राज्ञः नाम उपलभ्यते। एतैः प्रमाणैः आनन्दवर्धन – मम्मट- विश्वनाथ - जगन्नाथ इति एतेषां देशकालादिकम् अनुमीयते। ध्वनिकारादीनां देशकालकृतिविषये सामान्यः परिचयः इति एव अस्य पाठस्य विषयः।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् वा -

- ध्वनिकारस्य परिचयं ज्ञातुं प्रभवेत्।
- ध्वनिकारस्य कृतिं ज्ञातुं शक्नुयात्।

- ➢ कः आलङ्कारिकः ध्वनिसम्प्रदायस्य प्रवर्तकः इति ज्ञातुं प्रभवेत्।
- ➢ आलङ्कारिकः तस्य देशः कालः कृतयः इति विषये ज्ञानं भवेत्।
- ➢ आलङ्कारिकस्य वंशविषयकं ज्ञानं भवेत्।
- ➢ कः आलङ्कारिकः कस्य सम्प्रदायस्य प्रवर्त्तकः इति ज्ञानं प्रभवेत्।

२१.१) आनन्दवर्धनः

आनन्दवर्धनो हि काव्यशास्त्राकाशे सर्वसमुज्ज्वलं नक्षत्रम्। अलङ्कारसाहित्यस्य इतिहासे आनन्दवर्धनः एकम् उज्ज्वलपूर्णम् अध्यायं रचितवान्। अलङ्कारसाहित्ये आनन्दवर्धनं विना अलङ्कारशास्त्रं न कदापि पूर्णताम् एति। काव्यजगति तस्य ध्वन्यालोकस्य प्रवेशः सुमहत् सौभाग्यम् आधत्ते। ध्वनिशास्त्रस्य व्याख्यातृत्वेन स हि सर्वान् एव आचार्यान् अतिशेते। आनन्दवर्धनः काव्ये ध्वनिः एव प्रधानः इति मत्वा ध्वनिसम्प्रदायम् आरब्धवान्। ध्वन्यालोके ग्रन्थे ध्वनेः अभाववादिनः लक्षणावादिनः अनिर्वचनीयतावादिनः च मतं खण्डयित्वा सर्वप्रथमं ध्वनिं प्रतिपादितवान्। इदानीं तादृशस्य ध्वनिकारस्य देशकालकृतिविषये आलोच्यते।

देशः - आनन्दवर्धनः काश्मीरक्षितिपालस्य अवन्तिवर्मणः सभापण्डितः आसीत्। तत्र प्रमाणम् एकः श्लोकः वर्तते-

"मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः।

प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्मणः"।। इति

एतेन आगतं यत् आनन्दवर्धनः काश्मीरवासी आसीत्।

कालः - आनन्दवर्धनः काश्मीरक्षितिपालस्य अवन्तिवर्मणः सभापण्डितः आसीत्। अत एव अवन्तिवर्मणः कालः एव आनन्दवर्धनस्य अपि कालः भवति। अवन्तिवर्मणः समयः ८५५ – ८८३ ई. विद्यते, अत आनन्दवर्धनः अपि तत्कालिकः भवति।

वंशपरिचयः - आनन्दवर्धनस्य पितुः नाम नोणभट्टः इति आसीत्। केषाञ्चित् मते ध्वनिकारः ध्वन्यालोककारः च समानः जनः इति। स च आनन्दवर्धनः। तत्र प्रमाणं राजशेखरस्य एकः श्लोकः -

"ध्वनिनातिगम्भीरेण काव्यतत्त्वनिवेशिना।

आनन्दवर्धनः कस्य नासीदानन्दवर्धनः।। "इति

परन्तु ध्वन्यालोकस्य लोचनटीकाकारः अभिनवगुप्तः कथयति यत् ध्वनिकारः ध्वन्यालोककारश्च न समानः जनः। ध्वनिकारिकायाः उपरि रचितायाः वृत्तेः नाम ध्वन्यालोकः। तत्र कारिकाः ध्वनिकारिकाः उच्यन्ते। वृत्तेः नाम आलोकः इति। केषाञ्चित् मते तु ध्वनिकारस्य अपरं नाम सहृदयः।

कृतिः - अयम् आचार्यः ध्वनिप्रस्थानस्य प्रवर्त्तनाय ध्वन्यालोकं ग्रन्थं रचितवान्। ध्वन्यालोकस्य अपरं नाम सहृदयालोकः, काव्यालोकः। आनन्दवर्धनस्य ध्वन्यालोकातिरिक्ताः

विषमबाणलीला, अर्जुनचरितम्, देवीशतकम्, इति त्रयः कविताग्रन्थाः प्राप्यन्ते। ध्वन्यालोके त्रयः अंशाः सन्ति। ते च कारिका, वृत्तयः, उदाहरणानि इति। अनेककविकृतिभ्यः आनन्दवर्धनः उदाहरणानि स्वीकृतवान्। परन्तु स कारिकां वृत्तिं च स्वयम् एव रचितवान्। केचन कथयन्ति यत् आनन्दवर्धनः कस्यचित् अन्यस्य अज्ञातनाम्नः कृतिभ्यः कारिकाम् अपि स्वीकृतवान्। केवलं वृत्तिम् एव आनन्दवर्धनः रचितवान्। अत्र ग्रन्थे १२९ कारिकाः सन्ति। अत्र चत्वारः उद्योताः सन्ति। प्रथमे उद्योते ध्वनिविरोधिमतं निराकृत्य काव्यस्य आत्मानं ध्वनिम् उपस्थापितवान्। ततःपरं वस्तुध्वनिम्, अलङ्कारध्वनिम्, रसध्वनिं च प्रतिपादितवान्। पुनश्च ध्वनिः द्विविधः भवति। यथा- विवक्षितान्यपरवाच्यध्वनिः, अविवक्षितवाच्यध्वनिः इति। अत्र ध्वनेः विभागद्वयम् उदाहरणमाध्यमेन प्रतिपादितवान्। द्वितीये उद्योते अविवक्षितवाच्यध्वनेः भेदः, प्रेयसः रसध्वनेः भेदः, गुणालङ्कारयोः भेदः इति एते विषयाः आलोचिताः सन्ति। तृतीये उद्योते रीतिवृत्त्योः आलोचनं कृतम्। चतुर्थे उद्योते कविप्रतिभायाः गुणीभूतव्यङ्ग्यकाव्यस्य च आलोचनम्।

ध्वनिप्रस्थानस्य प्रथमः आचार्यः आनन्दवर्धनः। अयम् एव आचार्यः ध्वनिसम्प्रदायम् आरब्धवान्। ध्वन्यालोककारात् पूर्ववर्त्तिनः आचार्याः अलङ्कारम्, रीतिम्, गुणम् काव्यस्य आत्मानम् उक्तवन्तः। तेषु प्रथमः ध्वन्यालोककारः ध्वनिं काव्यस्य आत्मानं मन्यते। तिसृभिः शक्तिभिः शब्दः अर्थं प्रतिपादयति। ताश्च अभिधा, लक्षणा, तात्पर्यम् इति। एषा शक्तित्रयव्यतिरिक्ता काचित् व्यञ्जना वृत्तिः भवति। ध्वनिवादे व्याकरणप्रसिद्धस्य स्फोटतत्त्वस्य स्वीकारः अस्ति। काव्ये रीतिगुणालङ्काराणां स्थाननिर्णयं कृत्वा ध्वनिं प्रतिपादितवान्। आनन्दवर्धनस्य मते गुणादिकं केवलं वाच्यवाचकचारुत्वहेतुं व्यतिरिक्तं न किमपि अस्ति। काव्ये शब्दस्य अर्थस्य च स्वकीयप्राधान्यतां परित्यज्य वाच्यातिरिक्तं व्यङ्ग्यार्थं प्रतिपादयति, स ध्वनिः। तदुक्तम्-

"यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।

व्यङ्ग्यः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।। "इति

ध्वनिवादे गुणरीत्यलङ्कारादयः सर्वे एव रसपर्यावसायिनः। ध्वन्यालोककारस्य मतेन प्रभावितः अभिनवगुप्तः लोचनटीकां लिखितवान्।

पाठगतप्रश्नाः-१

१. ध्वन्यालोककारस्य समयः कः।

२. ध्वन्यालोककारस्य देशः कः।

३. ध्वन्यालोककारस्य पितुः नाम किम्।

४. आनन्दवर्धनः कं ग्रन्थं लिखितवान्।

५. ध्वनिसम्प्रदायस्य प्रवर्त्तकः कः।

६. ध्वन्यालोके कति कारिकाः सन्ति।

२१.२) अप्पयदीक्षितः

अलङ्काराकाशे आलङ्कारिकेषु अग्रगण्यः अप्पयदीक्षितः भवति। अयम् आचार्यः न केवलम् अलङ्कारशास्त्रे निपुणः भवति अपि तु इतरशास्त्रे अपि अस्य नैपुण्यं नितरां विद्यते। प्रायः सर्वस्मिन् शास्त्रे अस्य महाभागस्य ग्रन्थाः विद्यन्ते। अप्पयदीक्षितः साहित्यिकः, अद्वैती, विशिष्टाद्वैती, वैयाकरणः, आलङ्कारिकः, कविश्च आसीत्। प्रायः आचार्येण शतं ग्रन्थाः लिखिताः। तेषु अलङ्कारसम्बन्धिग्रन्थत्रयं विद्यते। अप्पयदीक्षितः, अप्पदीक्षितः, अप्पय्यदीक्षितः इति त्रिविधैः नामभिः संस्कृतजगति परिचितो भवति। जगन्नाथस्य रसगङ्गाधरग्रन्थे अपि त्रिविधं नाम एव श्रूयते।

देशः - अप्पयदीक्षितस्य जन्म दक्षिणभारते संजातम्। अयम् अप्पयदीक्षितः तामिळनाडु - अन्तर्गत-आर्काड्मण्डलस्थिते अडयप्पलं नाम्नि ग्रामे जन्म प्राप्तवान्। अप्यदीक्षितस्य देशः तामिळनाडुप्रदेशः आसीत्।

कालः - अप्पयदीक्षितस्य कालस्तु सप्तदशशतकम् आसीत्। आलङ्कारिकः जगन्नाथः अप्पयदीक्षितविरचितस्य चित्रमीमांसाग्रन्थस्य खण्डनं कृतवान्। एतेन ज्ञायते यत् अप्पयदीक्षितस्य जगन्नाथपूर्ववर्त्तिता आसीत्। अप्पयदीक्षितः प्रथमस्य वेङ्कटस्य निर्देशेन कुवलयानन्दनामकग्रन्थं रचितवान्। प्रथमवेङ्कटस्य कालस्तु १५८६- १६१३ख्रीष्टाब्दः। स एव कालः अप्पयदीक्षितस्य इति अनुमीयते। परन्तु तस्मिन् वंशे अप्पय इति नाम्ना बहवः आसन्। तस्मात् प्रकृताप्पयदीक्षितस्य कालनिर्धारणं तु दुष्करम्।

वंशपरिचयः - रङ्गराजाध्वरीन्दस्य पुत्रः अप्पयदीक्षितः। अयं भारद्वाजवंशोत्पन्नः आसीत्। स्वयमेव लिखति कुवलयानन्दे -

“इति श्रीमदद्वैतविद्याचार्य-श्रीमद्भरद्वाजकुल-जलधिकौस्तुभ-श्रीरङ्गराजाध्वरीन्द्र-वरसूनोः श्रीमदप्पयदीक्षितस्य कृतिः कुवलयानन्दः समाप्तः।” इति। अप्पयदीक्षितस्य सर्वे पितृपितामहादयः श्रोत्रियाः ज्योतिष्टोमादियागानाम् आहर्तारः सामवेदिनः आसन्। अद्वैतिनः अपि भूत्वा प्रायः शिवभक्तिपरायणाः आसन्। अप्पयदीक्षितस्य पितामहः आचार्यदीक्षितः आसीत्। अप्ययदीक्षितस्य आश्रयदाता वेङ्कटराजः आसीत्।

कृतिः - बहुभिः विश्वसनीयैः प्रमाणैः प्रतीयते यत् अप्पयदीक्षितस्य प्रायः शतं ग्रन्थाः विद्यन्ते। इतोऽपि अधिकसंख्याका एव ग्रन्थाः विद्यन्ते इति केचित् मन्यन्ते। अप्पयदीक्षितस्य वेदान्तसम्बन्धिग्रन्थाः, मीमांसासम्बन्धिग्रन्थाः, व्याकरणसम्बन्धिग्रन्थाः, शिवाद्वैतसम्बन्धिग्रन्थाः, स्तोत्रसम्बन्धिग्रन्थाः, अलङ्कारसम्बन्धिग्रन्थाः, काव्यसम्बन्धिग्रन्थाः च विद्यन्ते।

वेदान्तविषयकग्रन्थाः - १. सिद्धान्तलेशसंग्रहः, २. न्यायरक्षामणिः, ३. कल्पतरुपरिमलः, ४. न्यायमुक्तावली, ५. न्यायमणिमाला, ६. न्यायमञ्जरी, ७. अधिकरणपञ्चिका ८. तत्त्वमुक्तावली, ९. मणिमालिका इत्यादयः।

शिवाद्वैतपरायणाः ग्रन्थाः - १. शिखरिणी, २.रामायणतात्पर्यसङ्ग्रहः, ३. भारततात्पर्यसङ्ग्रहः, ४.शिवपूजाविधिः, ५.आनन्दलहरी, ६. शिवार्चनचन्द्रिका, ७. शिवाद्वैतनिर्णयः इत्यादयः ग्रन्थाः।

मीमांसाशास्त्रपरकग्रन्थाः - १. विधिरसायनम्, २. सुखोपयोजिनी, ३. उक्रपराक्रमः, ४. चित्रापटम्, ५. तान्त्रिकमीमांसा, ६. धर्ममीमांसापरिभाषा इत्यादयः।

व्याकरणे एकः ग्रन्थः विद्यते। तच्च पाणिनीयतन्त्रवादनक्षत्रमाला इति। काव्यशास्त्रे यादवाभ्युदयव्याख्या इति ग्रन्थः विद्यते। अलङ्कारशास्त्रे प्रायः चत्वारः ग्रन्थाः विद्यन्ते। ते च १. कुवलयानन्दः, २. चित्रमीमांसा, ३. वृत्तिवार्तिकम्, ४. लक्षणरत्नावली इति।

स्तोत्रसम्बन्धिग्रन्थाः - १. वरदराजस्तवः, २. इदंस्तवव्याख्या, ३. आत्मार्पणस्तुतिः, ४. मानसोल्लासः, ५. आदित्यस्तोत्रम्, ६. गङ्गाधराष्टकम् इत्यादयः। अत्र केषाञ्चित् प्रसिद्धग्रन्थानां नामोल्लेखः कृतः। प्रकृतपाठे आलङ्कारिकाणां विषये चर्चा भवति। अतः अलङ्कारशास्त्रसम्बद्धग्रन्थानां किञ्चित् सामान्येन परिचयः प्रदीयते। अप्पयदीक्षितः जयदेवविरचितं चन्द्रालोकग्रन्थं समाश्रित्य कुवलयानन्दनामकग्रन्थं प्रणीतवान्। अलङ्कारस्य उपरि टीकाविशेषः अयं ग्रन्थः। प्रायः ग्रन्थे २७३ श्लोकाः सन्ति। ग्रन्थकारः स्वयं कथयति यत् कुवलयानन्दग्रन्थे चन्द्रालोके विद्यमानान् अलङ्कारान् गृहीत्वा केचित् नवीनाः अलङ्काराः अपि प्रतिपाद्यन्ते। चन्द्रालोके शतम् अलङ्काराः विद्यन्ते। तैः अलङ्कारैः सह पञ्चदश नवीनाः अलङ्काराः प्रतिपादिताः सन्ति। तच्च प्राह-

"येषां चन्द्रालोके दृश्यन्ते लक्ष्यलक्षणश्लोकाः।

प्रायस्त एव तेषामितरेषां त्वभिनवा विरच्यन्ते।।" इति

अत्र अर्थालङ्कारस्य उपरि चर्चा विद्यते। राज्ञः वेङ्कटस्य निर्देशेन एव कुवलयानन्दग्रन्थं लिखितवान्।

चित्रमीमांसा इति अयम् उत्कृष्टग्रन्थः विद्यते। अत्र केवलं द्वादशानाम् अलङ्काराणां वर्णनं विद्यते। अत्र कारिकायाः रचनायाः परं गद्यवृत्त्या अन्येषां प्राक्तनानाम् आचार्याणां मतानि उपस्थापितवान्। क्वचित् क्वचित् मतानां खण्डनमपि कृतम् अस्ति। काव्यस्य ध्वनिः, गुणीभूतव्यङ्ग्यम्, चित्रम् इति त्रिविधः विभागः विद्यते। इतः परम् उपमालङ्कारस्य विचारं कृतवान्। द्वादश अलङ्काराः उपमान्तर्गताः इति दर्शितम्। परन्तु जगन्नाथः रसगङ्गाधरे चित्रमीमांसायाः खण्डनं कृतवान्। पुनश्च जगन्नाथः चित्रमीमांसाखण्डनम् इति पुस्तकं विरच्य दीक्षितस्य मतं खण्डितवान्।

वृत्तवार्तिकम् इत्यपि अपरः अलङ्कारग्रन्थः विद्यते। अस्मिन् ग्रन्थे परिच्छेदद्वयम् अस्ति। अत्र अभिधालक्षणयोः विषये चर्चा भवति। अत्र व्यञ्जनाविषये तु न किमपि प्रोक्तम् अस्ति।

केचन प्रातिपादयन्ति यत् लक्षणरत्नावली इति अपरः अलङ्कारग्रन्थः विद्यते। अत्र नान्दीपाठः, सूत्रधारः, पूर्वरङ्गम्, प्रस्तावना इति एते विषयाः चर्चिताः।

पाठगतप्रश्नाः-२

७. अप्पयदीक्षितस्य कालः कः।

८. अप्पयदीक्षितस्य देशः कः।

९. अप्पयदीक्षितस्य पितुः नाम किम्।

१०. अप्पयदीक्षितस्य एकस्य अलङ्कारग्रन्थस्य नाम लिखत।

११. किम् आधारीकृत्य कुवलयानन्दः रचितः।

१२. कुवलयानन्दे कति श्लोकाः सन्ति।

१३. वृत्तवार्तिके कति परिच्छेदाः सन्ति।

१४. चित्रमीमांसा इति ग्रन्थस्य खण्डनपरकग्रन्थः कः।

१५. अप्पयदीक्षितस्य आश्रयदाता कः।

२१.३) मम्मटः

आलङ्कारिकेषु अग्रगण्यः आचार्यः अयम्। भारतीयसंस्कृतसाहित्येषु एकोऽपि छात्रः न विद्यते, यः मम्मटं न जानाति। ध्वनिकारात् परम् अयम् आचार्यः भवति। अलङ्कारसाहित्ये यावन्मम्मटस्य उदयो न जातः तावत्काले ध्वनिविरोधिनः ध्वनिविरोधिग्रन्थान् लिखितवन्तः। परं मम्मटेन ध्वनिविरोधिनः तथा अधिक्षिप्ताः यथा पुनस्ते ध्वनिं विरोद्धुं साहसं न अकुर्वन्। अत एव तु अयम् काव्यप्रकाशकर्ता मम्मटः वाग्देवतावतारः ध्वनिप्रस्थानस्य परमाचार्यः उच्यते। संस्कृतजगति राजानक इति उपाधिना परिचितः भवति। मम्मटस्य देशकालकृतिविषये किञ्चित् आलोच्यते।

देशः- अयं मम्मटाचार्यः काश्मीरवासी भोजराजात् परवर्त्ती च भवति। मम्मट इति नाम राजानक इति उपाधिश्च प्रमाणयति यत् मम्मटाचार्यः काश्मीरवासी आसीत्।

कालः- ध्वनिकारस्य आनन्दवर्धनस्य ध्वनिप्रस्थानं सुदृढतया उपस्थापयितुं मम्मटः काव्यप्रकाशग्रन्थं लिखति स्म। एतेन आगतं यत् आनन्दवर्धनात् परवर्त्ती मम्मटाचार्यः। मम्मटाचार्यः स्वग्रन्थे अभिनवगुप्तस्य मतानि उल्लिखितवान्। अभिनवगुप्तः एकादशशतके आसीत्। अतः ततः अपि परवर्त्ती मम्मटाचार्यः। पद्मगुप्तस्य नवसाहसांकचम्पूकाव्ये स्थितस्य भोजराजप्रंशसाश्लोकस्य उद्धरणं काव्यप्रकाशे कृतम् अस्ति। नवसाहसाङ्कचम्पूकाव्यस्य रचनाकालः एकादशशतकम्। अयम् एव कालः मम्मटाचार्यस्य अपि। भोजराजात् परवर्त्ती अयम् आचार्यः। भोजराजस्य शासनकालः ९९६ ई. - १०५१ ई. आसीत्। अत एव मम्मटाचार्यस्य कालः एकादशशतकम्।

वंशपरिचयः - मम्मटस्य पितुः नाम जैयटः इति। मम्मटस्य अनुजौ कैयटोव्वटौ। अयं मम्मटाचार्यः नैषधीयचरितग्रन्थस्य रचयितुः मातुलः आसीत्। मूलतः मम्मटाचर्यः काश्मीरवासी आसीत्।

परन्तु संस्कृतशिक्षायाः प्राप्त्यर्थं संस्कृतशिक्षायाः पीठस्थानं वाराणसीम् आगतवान्। एवञ्च वाराणस्याम् उपविश्य एव काव्यप्रकाशग्रन्थं रचितवान्।

कृतिः - मम्मटस्य काव्यप्रकाशः इति एका एव कृतिः विद्यते। तत्रापि मम्मटः सम्पूर्णकाव्यप्रकाशग्रन्थं न रचितवान्। काव्यप्रकाशः दशमपरिच्छेदगतपरिकरालङ्कारावधिः मम्मटेन कृतः, ततः अवशिष्टभागः अल्लटनाम्ना केनचित् विदुषा कृतः अस्ति। तदेव आह-

"कृतोऽयं मम्मटाचार्यैर्ग्रन्थः परिकरावधिः।

प्रबन्धः पूरितः शेषो विधायाल्लटसूरिणा"॥ इति

मम्मटस्य विद्वत्तां प्रमाणयितुं तत्काव्यप्रकाश एव अलम्। मम्मटस्य अपरा कृतिः शब्दव्यापारवृत्तिः इति ग्रन्थः। मम्मटाचार्यः सङ्गीतरत्नमाला इत्यपि एकं ग्रन्थं रचितवान्। परन्तु एतौ द्वौ ग्रन्थौ सम्प्रति न एव उपलभ्येते। पुनश्च ग्रन्थद्वयस्य रचयिता न मम्मटः इत्यपि ऐतिहासिकाः प्रवदन्ति। काव्यप्रकाशे दश उल्लासाः सन्ति। अस्मिन् ग्रन्थे प्रायः १४३ कारिकाः सन्ति। वस्तुतस्तु मम्मटाचार्यः ध्वनिवादस्य समर्थनाय काव्यप्रकाशग्रन्थं रचितवान्। काव्यप्रकाशस्य त्रयः अंशाः सन्ति। यथा- कारिका, वृत्तिः, उदाहरणम् इति। भरतस्य काश्चित् कारिकाः स्वकीयग्रन्थे निवेशितवान्। अवशिष्टाः कारिकाः स्वयम् एव लिखितवान्। वृत्तिस्तु मम्मटेन स्वयम् एव रचिता। उदाहरणानि परेषां पुस्तकात् स्वीकृतानि सन्ति। प्रायः षट् कारिकाः भरतस्य नाट्यशास्त्रात् स्वीकृतवान्। अतः काव्यप्रकाशस्थकारिकाः भरतेन रचिताः सन्ति इति ऐतिहासिकाः विवदन्ते। परन्तु मतमिदं भ्रान्तम् अस्ति। मम्मटाचार्यः आनन्दवर्धनस्य अभिनवगुप्तस्य च मतेन प्रभावितः सन् ध्वनिसिद्धान्तस्य सुदृढकरणाय ग्रन्थम् एकं रचितवान्। मम्मटमतेन काव्यस्य मूलं व्यञ्जना भवति। काव्यप्रकाशस्य प्रथमोल्लासे काव्यरचनायाः उद्देश्यम्, काव्यलक्षणम्, काव्यभेदः इति एते विषयाः चर्चिताः। द्वितीयोल्लासे शब्दवृत्तेः अर्थवृत्तेः च वर्णनम् अस्ति। तृतीयोल्लासे व्यञ्जनावृत्तेः सुविस्तृतं वर्णनम् अस्ति। चतुर्थोल्लासे ध्वनिभेदः रसस्वरूपालोचनम् इति एते विषयाः चर्चिताः सन्ति। पञ्चमोल्लासे ध्वनिगुणीभूतव्यङ्गकाव्ययोः वर्णनम्, तत्तद्भेदाः वर्णिताः सन्ति। षष्ठोल्लासे चित्रकाव्यस्य वर्णनम् अस्ति। सप्तमोल्लासे दोषाणां वर्णनम्, अष्टमोल्लासे गुणानां वर्णनम्, नवमोल्लासे शब्दालङ्काराणां वर्णनम्, दशमोल्लासे अर्थालङ्काराणां वर्णनम् अस्ति। काव्यप्रकाशस्य प्रसिद्धिः महती विद्यते। संस्कृतजगति श्रीमद्भगवद्गीतायाः अधिकाः टीकाः उपलभ्यन्ते। ततः परं मम्मटविरचितस्य काव्यप्रकाशस्य अधिकाः टीकाः विद्यन्ते। प्रायः संस्कृतेन ७५ टीकाः सन्ति। संस्कृतेतरभाषायाम् अपि बह्व्यः टीकाः सन्ति। एतेन काव्यप्रकाशस्य लोकप्रसिद्धिं ज्ञातुं शक्यते।

पाठगतप्रश्नाः-३

१६. मम्मटस्य उपाधिः का वर्तते।

१७. मम्मटस्य कालः कः।

१८. मम्मटस्य देशः कः।

१९. मम्मटस्य पितुः नाम किम्।

२०. मम्मटस्य ग्रन्थस्य नाम किम्।

२१. काव्यप्रकाशे कति उल्लासाः सन्ति।

२२. काव्यप्रकाशे कति कारिकाः सन्ति।

२३. मम्मटः कुत्र अध्ययनं कृतवान्।

२१.४) भोजराजः

अलङ्काराकाशे भोजराजः इति नाम तु अतीव प्रसिद्धम्। महाराजः भोजः धारानगरशासकः आसीत्। राजकार्येण सह शास्त्रस्य चर्चाम् अकुर्वन् इमे महाभागाः। महाराजस्य भोजस्य कविजनप्रियत्वं तु सर्वजनप्रसिद्धं विद्यते। महाराजभोजस्य शास्त्रेषु महती प्रीतिः आसीत्। अत एव स्वकीयराजसभायां विदुषः आह्वानं सदा भवति स्म। सर्वदा एव राजसभायां शास्त्रचर्चा भवति स्म। एतैः कर्मभिः साकं स्वयम् अपि शास्त्राध्ययनम् अकरोत्। एवञ्च सरस्वतीकण्ठाभरणम्, शृङ्गारप्रकाशः, रामायणचम्पूः इति एते ग्रन्थाः रचिताः आसन्। अत एव संस्कृतनभसि अयं महापण्डितः एकम् उज्ज्वलपूर्णं नक्षत्रम्।

देशः - प्राचीनकाले शिलाखण्डादिषु महाराजानां शासनकालः वंशपरिचयादयः च स्पष्टतया लिख्यन्ते। अयं राजा सन् कविः भवति। अतः महापण्डितस्य भोजस्य देशकालनिर्णये क्लेशः न विद्यते। महाराजः भोजः मालवदेशस्य धारानगरशासकः परमारवंश्यश्च आसीत्। अतः महाराजभोजस्य देशः मालवदेशः आसीत् इति निश्चप्रचम्।

कालः - अयं राजा १०१८ ईशवीये सिंहासनारूढो भूत्वा १०६३ पर्यन्तं शासनकार्यं चालितवान्। अतः भोजस्य समयः एकादशशतकम् आसीत्। मालवेशः स काश्मीरकानन्तराजसमकालिक इति।

"स च भोजनरेन्द्रश्च दानोत्कर्ष विश्रुतौ।

सूरी तस्मिन् क्षणे तुल्यं द्वावास्तां कविबान्धवौ।"

इति राजतरङ्गिणीवचनात् ज्ञायते। अनन्तराजश्च १०२० – ११५८ मितवैक्रमाब्दानभितः स्थितिमान् इति राजतरङ्गिणीतः ज्ञायते। एतदतिरिक्तं १०७८ मितवैक्रमाब्दे कृतं भोजस्य दानपत्रम् अपि लभ्यते इति तस्य अपि स्थितिकालः १०३० – १११० मितवैक्रमाब्दान्तरालवर्त्ती इति समम् अनुमीयते।

कृतिः - जगति राजकार्यं कुर्वन्तः शास्त्राध्ययनं कृत्वा शास्त्रादिरचनां कृतवन्तः इति एतादृशाः मानवाः दुर्लभाः सन्ति। भोजराजस्य सरस्वतीकण्ठाभरणम्, शृङ्गारप्रकाशश्च काव्यसम्बन्धौ ग्रन्थौ। सरस्वतीकण्ठाभरणे हि पञ्च परिच्छेदाः सन्ति। तत्र प्रथमे परिच्छेदे दोषगुणयोः विवेचनम् अस्ति। तत्र पदगताः षोडश, वाक्यगताः षोडश, वाक्यार्थगताः षोडश इति अष्टाचत्वारिंशद्दोषाः विवेचिताः सन्ति। एवमेव शब्दगताः चतुर्विंशतिः अर्थगताः चतुर्विंशतिः इति अष्टाचत्वारिंशद्गुणाः सन्ति। द्वितीये परिच्छेदे

चतुर्विंशतिः शब्दालङ्कारा:, तृतीये परिच्छेदे अर्थालङ्कारा:, चतुर्थे उभयालङ्कारा:, पञ्चमे हि रस-भाव-सन्धि-वृत्तीनां निरूपणम्। रत्नेश्वरः सरस्वतीकण्ठाभरणस्य रत्नदर्पणाख्यां व्याख्यां रचितवान्। एषा व्याख्या तृतीयपरिच्छेदपर्यन्तम् अस्ति। चतुर्थस्य हि परिच्छेदस्य टीका जगद्धरविरचिता, चतुर्थपञ्चमयोः जीवानन्दप्रणीता व्याख्या च लभन्ते।

शृङ्गारप्रकाशः अस्य अपरः ग्रन्थः विद्यते। अत्र हि षट्त्रिंशत्प्रकाशाः सन्ति। तत्र हि आद्याष्टप्रकाशेषु शब्दार्थविषयकवैयाकरणमतानि निरूपितानि सन्ति। नवमे गुणाः, दशमे दोषाः, एकादशे महाकाव्यम्, द्वादशे नाट्यञ्च सप्रपञ्चं निरूपितानि। शेषेषु चतुर्विंशतिप्रकाशेषु साङ्गोपाङ्गं रसाः विवेचिताः सन्ति। भोजमते तु शृङ्गार एव सर्वरसेश्वरः। यथोक्तम्-

"शृङ्गारवीरकरुणाद्भुतरौद्रहास्यबीभत्सवत्सलभयानकशान्तनाम्नः।
अम्नासिषुर्दश रसान् सुधियो वयं तु शृङ्गारमेव रसनाद्रसनाम नाम।।" इति।

किन्तु यः शृङ्गारः स न केवलं युनोः परस्पराकाङ्क्षात्मा अपि तु धर्मार्थकाममोक्षाख्यचतुर्विधभेदात्मकः अस्ति। काव्यशास्त्रकानने हि शृङ्गारप्रकाशः सर्वाधिकदीर्घकायं पुष्पं सर्वोत्कृष्टम्। भोजराजस्य चम्पूरामायणम् इति काव्यम् अपि विद्यते। परन्तु अलङ्कारसम्बन्धग्रन्थो न भवति। अतः तस्य चर्चादिकं प्रकृतपाठे न क्रियते।

पाठगतप्रश्नाः-४

२४. भोजराजस्य देशः कः।
२५. भोजराजस्य स्थितिकालः कः।
२६. सरस्वतीकण्ठाभरणम् इत्यस्य ग्रन्थस्य रचयिता कः।
२७. सरस्वतीकण्ठाभरणे कति परिच्छेदाः सन्ति।
२८. शृङ्गारप्रकाशे कति प्रकाशाः सन्ति।
२९. भोजमते काव्ये कः रसः प्रधानो भवति।
३०. चम्पूरामायणस्य कर्ता कः।

२१.५) विश्वनाथः

संस्कृतालङ्कारसाहित्ये मम्मटभट्टात् परं कविराजः विश्वनाथः एव अत्यन्तं प्रसिद्धः आसीत्। एवञ्च मम्मटस्य काव्यप्रकाशात् परम् अलङ्कारसाहित्ये कविराजविश्वनाथस्य साहित्यदर्पणः सर्वाधिकः लोकप्रियः ग्रन्थः भवति। सर्वशास्त्रस्वतन्त्रस्य कविराजविश्वनाथस्य जन्मसमयादिनिरूपणे स्फुटतरं तादृशं किम् अपि प्रमाणं न उपलभ्यते तथापि तन्निरूपणं न अतीव कठिनम् इव प्रतिभाति। अत एव सम्प्रति विश्वनाथस्य देशकालकृतिविषयकं किञ्चित् आलोचनं क्रियते।

देशः - कविराजः विश्वनाथः उत्कलदेशीयः आसीत्। यतो हि विश्वनाथः श्रीनरसिंहस्य सभापण्डितः सन्धिविग्रहकश्च आसीत्। अस्य पितामहोऽपि श्रीनरसिंहाख्यस्य नृपतेः मुख्यसभास्थः आसीत्। श्रीनरसिंहस्य राज्यम् उत्कलदेशः आसीत्। अत एव विश्वनाथस्य वासस्थानम् उत्कलप्रान्तम् इति।

कालः - कविराजः विश्वनाथः मम्मटात् अर्वाचीनः आसीत्। यतो हि विश्वनाथविरचिते साहित्यदर्पणनामकग्रन्थे मम्मटोक्तकाव्यलक्षणस्य खण्डनं दृश्यते। विश्वनाथः जगन्नाथात् प्राचीनः आसीत्। यतो हि जगन्नाथः स्वकीयरसगङ्गाधरनामकग्रन्थे लिखति -" यत्तु रसवदेव काव्यमिति साहित्यदर्पणे निर्णीतं तन्न" इति। मम्मटजगन्नाथयोः मध्यवर्ती कालः विश्वनाथस्य भवति। साहित्यदर्पणस्य चतुर्थपरिच्छेदे यवनाधिपतेः अलावुद्दीनस्य स्मारकः श्लोकः -

"सन्धौ सर्वस्वहरणं विग्रहे प्राणनिग्रहः।

अल्लावुद्दीननृपतौ न सन्धिर्न च विग्रहः॥"

इति एवं श्लोकः विलसति। अनेन श्लोकेन अल्लाउद्दीनखिलजी स्मृतः भवति। अयं नृपतिः १३१० ईशवीये मृतः भवति। इत्थञ्च यदि निष्कर्षरूपेण विविच्यते तदा एकादशद्वादशत्रयोदशशताब्दीसम्भूताः मम्मट-श्रीहर्ष-जयदेवप्रभृतयः। तेषां वाक्यानि साहित्यदर्पणे "तददोषौ शब्दार्थौ" "धन्यासि वैदर्भि" "कदली कदली" इत्यादिना स्पष्टमेव उद्धृतानि सन्ति। पञ्चदशसमुद्भूतेन काव्यप्रदीपकृता गोविन्दठाक्कुरेण तददोषौ शब्दार्थौ इति विचारवेलायां "अर्वाचीनास्तु" इत्यादिना विश्वनाथमतम् एव उपस्थापितम् आसीत्। एभिः विचार्यमाणैः विश्वनाथकविराजस्य समयः चतुर्दशशतकं मन्यते।

वंशपरिचयः - विश्वनाथः समृद्धकुलसम्भवश्च आसीत्। अस्य कुलं पाण्डित्ये प्रसिद्धम्। विश्वनाथस्य पितुः नाम चन्द्रशेखरः आसीत्। विश्वनाथस्य पिता चन्द्रशेखरः पुष्पमाला, भाषार्णवश्च इति पुस्तकद्वयं रचितवान्। स्वयम् एव विश्वनाथः साहित्यदर्पणग्रन्थे कथयति -

"श्रीचन्द्रशेखरमहाकविचन्द्रसूनुश्रीविश्वनाथकविराजकुलं प्रबन्धम्।

साहित्यदर्पणममुं सुधियो विलोक्य साहित्यतत्त्वमखिलं सुखमेव वित्त।। "इति। चन्द्रशेखरस्य पुत्रः विश्वनाथः इति तु अयं श्लोकः एव प्रमाणम्। विश्वनाथस्य पितामहः नारायणदासः आसीत्। नारायणदासस्य पितामहत्वम् अपि साहित्यदर्पणस्थश्लोकतः अवगम्यते। तथा हि - " यदाहुः - श्रीकलिङ्गभूमण्डलाखण्डलमहाराजाधिराजश्रीनरसिंहदेवसभायां धर्मदत्तं स्थगयन्तः सकलहृदयगोष्ठीगरिष्ठकविपण्डितास्मत्पितामहश्रीनारायणदासपादाः" इति। विश्वनाथस्य पितामहस्य भ्राता चण्डीदासः आसीत्। चण्डीदासः काव्यप्रकाशस्य दीपिकानामटीकां रचितवान्। सन्धिविग्रहकः इति विशेषणं विश्वनाथस्य आसीत्। एतेन अवगम्यते यत् जात्या ब्राह्मणः अयम् आसीत्।

कृतिः - प्रकाण्डविद्वत्कुले समुत्पन्नः विश्वनाथः अपि सर्वशास्त्रस्वतन्त्रः महान् विद्वान् च आसीत्। अयं पण्डितप्रवरः न केवलं संस्कृतभाषां जानाति स्म, अपि तु अष्टादश भाषाः जानाति स्म। अस्य "अष्टादशभाषावारविलासिनीभुजङ्ग" इति उपाधिः नानाभाषाभिज्ञत्वं समर्थयति। विश्वनाथस्य

कृतयः हि साहित्यदर्पणः, काव्यप्रकाशदर्पणः, राघवविलासमहाकाव्यम्, कुवलयाश्वचरितकाव्यम्, प्रभावतीपरिणयनाटिका, चन्द्रकलानाटिका, नरसिंहविजयकाव्यम्, प्रशस्तिरत्नावली च इति।

अस्य कृतिषु प्रसिद्धो ग्रन्थः साहित्यदर्पणः। अत्र काव्यस्य नाट्यस्य च सर्वाङ्गीणं विवेचनम् अस्ति। साहित्यदर्पणो हि काव्यशास्त्रस्य रत्नभूतः ग्रन्थः भवति। अत्र हि ग्रन्थे दश परिच्छेदाः सन्ति। तत्र प्रथमे परिच्छेदे काव्यविवेकः, द्वितीये परिच्छेदे शब्दशक्तयः, तृतीये परिच्छेदे रसनिरूपणम्, चतुर्थे परिच्छेदे ध्वनिविवेकः, पञ्चमे परिच्छेदे व्यञ्जनावृत्तिनिरूपणम्, षष्ठे काव्यविभागः, सप्तमे परिच्छेदे दोषप्रपञ्चः, अष्टमे परिच्छेदे गुणनिरूपणम्, नवमे परिच्छेदे रीतिनिरूपणम्, दशमे परिच्छेदे शब्दार्थालङ्कारविचार इति विवेच्यविषयाः सन्ति। काव्यशास्त्रविषये वस्तुतस्तु विश्वनाथो मम्मटम् एव अनुसरति किन्तु मम्मटं यत्र तत्र दूषयति अपि। विशेषतः काव्यप्रकाशकारोक्तकाव्यलक्षणं खण्डयित्वा "वाक्यं रसात्मकं काव्यम्" इति स्वमतं लक्षणं स्थापयति। साहित्यदर्पणस्य उपरि बहव्यः टीकाः समागताः सन्ति। यथा- आनन्ददासस्य लोचनाख्या टीका, महेश्वराख्यस्य विज्ञप्रिया टीका, जीवानन्दविद्यासागरस्य विमला टीका, कृष्णमोहनस्य लक्ष्मीः टीका, लोकमणिदाहालाख्यस्य कला टीका। साहित्यदर्पणस्य परवर्तिग्रन्थेषु प्रभावः सुतरां स्पष्टः। रसविवेचने अलङ्कारनिरूपणे काव्यभेदविवेके च तत्पश्चाद्वर्त्तिनः साहित्यदर्पणम् एव उपजीवन्ति।

पाठगतप्रश्नाः-५

३१. विश्वनाथः कुत्रत्यः।

३२. विश्वनाथस्य स्थितिकालः कः।

३३. साहित्यदर्पणग्रन्थस्य रचयिता कः।

३४. विश्वनाथस्य पितुः नाम किम्।

३५. विश्वनाथस्य पितामहस्य नाम किम्।

३६. साहित्यदर्पणे कति परिच्छेदाः सन्ति।

३७. विश्वनाथस्य पिता कं ग्रन्थं रचितवान्।

३८. चण्डीदासः कं ग्रन्थं रचितवान्।

२१.६) जगन्नाथः

संस्कृतजगति आलङ्कारिकेषु अन्यतमः अयम् आचार्यः। संस्कृतसाहित्ये बहुविधाः ग्रन्थाः जगन्नाथेन विरचिताः सन्ति। रसगङ्गाधरनामकग्रन्थं विरच्य जगन्नाथः आलङ्कारिकेषु अग्रगण्यः भवति। अयं जगन्नाथः आचार्यः विविधविषयेषु महान् पण्डितः आसीत्। पण्डितराजस्य जगन्नाथस्य अभ्युदयः

काव्यशास्त्रे नव्यपरम्परोद्द्योतकः। तस्य हि रसगङ्गाधरः काव्यसिद्धान्तान् नव्यन्यायपरम्परया व्याख्याति।

देशः -पण्डितराजः कुत्र जातः, कदा वा जात इति यथातथ्येन वक्तुं न शक्यते। अयं कोणसीमास्थानस्य त्रिलिङ्गब्राह्मणः आसीत्। आन्ध्रप्रदेशस्य पूर्वगोदावरीजनपदे इदं स्थानं समापतति। केचित् वदन्ति यत् पण्डितराजः गुण्टूरजनपदस्य तेनालीप्रखण्डे दाउनूरूग्रामे आसीत्। इदम् अनुमानं तदीयां कुलपरम्पराम् आश्रित्य सम्भवति। प्रतीयते गुण्टूरजनपदात् पूर्वगोदावरीजनपदं पण्डितराजपूर्वजाः गोदावरीं गताः भवेयुः। किन्तु जगन्नाथस्य रसगङ्गाधरे पण्डितराजस्य पितुः वाराणस्याम् अवस्थितिः प्रमाणिता भवति। एवं पण्डितराजस्य जन्मभूमिः अथ च विद्याभूमिः वाराणसी तथा च कर्मभूमिः जयपुरम्, दिल्लीनगरम्, मधुपुरी, असमप्रदेशः, अन्ते पुनः वाराणसी इति।

कालः - स हि शाहजहानस्य सभापण्डित आसीत् इति तस्य शाहजहानसमकालिकत्वं भवति। उक्तञ्च -

"दिल्लीवल्लभापाणिपल्लवतले नीतं नवीनं वयः।

दिल्लीश्वरो वा जगदीश्वरो वा मनोरथान् पूरयितुं समर्थः।

अन्यैर्नृपालैः परिदीयमानं शाकाय वा स्याल्लवणाय वा स्यात्। "इति।

शाहजाहांसम्राजस्य शासनकालः १६२८ – १६५८ ई. मन्यते। पण्डितराजजीवितमु इति अस्ति एकः तेलेगुग्रन्थः। तद्दिशा पण्डितराजस्य जन्मसमयः १६०० ई. वर्ष आसीत्। स स्वयमेव "दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः" इति कथयति इति मुगलप्रासादप्रवेशकाले स न्यूनम् अपि त्रिंशद्वर्षवयस्कस्तु आसीत्। तत्र तेन पञ्चदशवर्षाणि व्यतीतानि। यदा स देहलीं त्यक्तवान् तदा स पञ्चचत्वारिंशद्वर्षवयस्क आसीत् इति तस्य जन्म १६५५ मितवैक्रमाब्दम् इति अभितोऽनुमानं शक्यते। अत एव अयं जगन्नाथः सप्तदशशतकवर्त्ती आसीत्।

वंशपरिचयः - पण्डितराजो हि तैलङ्गो ब्राह्मणः आसीत्। अस्य पिता पेरुभट्टः आसीत्। अस्य माता लक्ष्मीदेवी।

विद्यावैभवम् - पण्डितराजपितुः गुरवः आसन् ज्ञानेन्द्रभिक्षुः, श्रीमहेन्द्रः, श्रीखण्डदेवः, अथ च शेषवीरेश्वरः।

"श्रीमज्ज्ञानेन्द्रभिक्षोरधिगतसकलब्रह्मविद्याप्रपञ्चः

काणादीराक्षपादीरपि गहनगिरो यो महेन्द्रादवेदीत्।। "

जगन्नाथः पितुः पेरुभट्टात् ज्ञानेन्द्रभिक्षोः सकलविद्यां पठितवान्। अस्य पिता पेरुभट्टः सर्वविद्याधरः आसीत्। पण्डितराजः अपि सर्वथा पितरम् एव अनुसरति स्म। अयं चापि पितुः आशिषा सर्वविद्याधरत्वम् आप्तवान्। प्रायः सर्वस्मिन् शास्त्रे जगन्नाथस्य पाण्डित्यम् अभावनीयं विद्यते।

कृतिः - संस्कृतजगति जगन्नाथस्य कृतिः अधिकाम् एव प्रशस्तिं प्राप्तवती। प्रायः सर्वस्मिन् शास्त्रे जगन्नाथस्य परिश्रमो विद्यते। जगन्नाथस्य कृतीनां विवरणं प्रस्तूयते।

१. गङ्गालहरी - द्विपञ्चाशत्पद्यबद्धा गङ्गास्तुतिः।

२. सुधालहरी - द्वात्रिंशत्पद्यात्मिका सूर्यस्तुतिः।

३. अमृतलहरी - एकादशश्लोककाया यमुनाप्रशस्तिः।

४. करुणालहरी - चतुषष्टिश्लोकमिता विष्णुस्तुतिः।

५. लक्ष्मीलहरी - एकचत्वारिंशत्पद्यात्मिका लक्ष्मीस्तुतिः।

६.यमुनावर्णनचम्पूः - चम्पूकाव्यविशेषः।

७. आसफविलासः - आसफखाँमहोदयस्य प्रशस्तिः।

८. प्राणाभरणम् - कामरूपाधीशस्य प्राणनारायणस्य प्रशस्तिः।

९. जगदाभरणम् - उदयपुराधीशराणाकर्णसिंहसूनोर्जगत्सिंहस्य प्रशस्तिः।

१०. चित्रमीमांसाखण्डनम् - अप्पयदीक्षितकृतस्य चित्रमीमांसाग्रन्थस्य खण्डनात्मकम् आलोचनम्।

११. मनोरमाकुचमर्दनम् - सिद्धान्तकौमुदीटीकायाः मनोरमायाः खण्डनम्।

१२. रसगङ्गाधरः - अपूर्णः अतिप्रौढः अलङ्कारशास्त्रग्रन्थः।

१३. भामिनीविलासः - कवितासङ्ग्रहविशेषः ग्रन्थः।

अत्र रसागङ्गाधरनामकस्य अलङ्कारग्रन्थस्य किञ्चित् आलोचनं क्रियते। रसगङ्गाधरग्रन्थे द्वे एव आनने दृश्येते। ग्रन्थश्च अयम् असम्पूर्णः अस्ति। अत्र हि काव्यस्वरूपम्, काव्यभेदाः, रसविवेकः, शब्दगुणानां लक्षणम्, अर्थगुणानां लक्षणम्, भावलक्षणम्, ध्वनिविवेकः, शक्तिविवेकः, अलङ्कारनिरूपणम्, इति एते विषयाः प्रतिपादिताः सन्ति।

जगन्नाथः कस्याञ्चन यवनयुवत्याम् आसक्तः जातिच्युतो भूत्वा ताम् उपमेये। तस्यां यवनयुवत्यां मृतायां जगन्नाथः राजाश्रयं परित्यज्य मथुराम् आयातः। तत्र तस्य १६७४ ई. मृत्युः अभवत्। मृत्योः पूर्वं प्रायश्चित्तं कर्त्तुम् अपि सन्नद्ध आसीत् परं तत्कालप्रसिद्धौ पण्डितौ भट्टजीदीक्षिताप्पय्यदीक्षितौ नानुमेनाते। तत्र कारणं तयोः जगन्नाथेन सह शास्त्रमतभेद एव उच्यते।

पाठगतप्रश्नाः-६

३९. जगन्नाथस्य समयः कः।

४०. जगन्नाथस्य देशः कः।

४१. कः रसगङ्गाधरं रचितवान्।

४२. रसगङ्गाधरे कति आननानि।

४३. जगन्नाथस्य पितुः नाम किम्।

४४. जगन्नाथस्य मातुः नाम किम्।

पाठान्तप्रश्नाः

१. आनन्दवर्धनस्य विषये लघुटिप्पणीं लिखत।

२. आनन्दवर्धनस्य देशकालकृतिविषये लघुटिप्पणीं लिखत।

३. ध्वन्यालोकस्य विषये लघुटिप्पणीं लिखत।

४. अप्पयदीक्षितस्य विषये लघुटिप्पणीं रचयत।

५. अप्पयदीक्षितस्य देशकालकृतिविषये लघुटिप्पणीं लिखत।

६. कुवलयानन्दस्य विषये लघुटिप्पणीं लिखत।

७. मम्मटाचार्यस्य विषये लघुटिप्पणीं रचयत।

८. मम्मटाचार्यस्य देशकालकृतिविषये लघुटिप्पणीं लिखत।

९. काव्यप्रकाशस्य विषये लघुटिप्पणीं रचयत।

१०. भोजराजस्य सम्बन्धे लघुटिप्पणीं लिखत।

११. भोजराजस्य देशकालकृतिविषये लघुटिप्पणीं लिखत।

१२. भोजराजस्य कृतिविषये लघुटिप्पणीं लिखत।

१३. विश्वनाथस्य देशकालकृतिविषये लघुप्रबन्धं लिखत।

१४. विश्वनाथस्य कृतिविषये लघुटिप्पणीं लिखत।

१५. विश्वनाथस्य विषये लघुटिप्पणीं रचयत।

१६. जगन्नाथस्य देशकालकृतिविषये लघुप्रबन्धं लिखत।

१७. जगन्नाथस्य कृतिविषये लघुटिप्पणीं रचयत।

पाठसारः

यस्मिन् खलु अवगते काव्यस्य निर्माणे स्वरूपदोषगुणालङ्कारादीनाम् अवधारणे च शक्तिः उन्मिषति तद् अलङ्कारशास्त्रम्। यथा च व्याकरणं भाषायां व्युत्पत्त्यै अपेक्ष्यते तथा अलङ्कारशास्त्रम् अपि काव्ये नैपुण्याय अपेक्ष्यते। पाठे अस्मिन् आलङ्कारिकाणां देशकालकृतिविषयिणी चर्चा क्रियते। नवमशतकवर्त्ती काश्मीरवासी आनन्दवर्धनः ध्वन्यालोकग्रन्थं रचितवान्। आनन्दवर्धनः अनेन ग्रन्थेन ध्वनिप्रस्थानम् आरब्धवान्। आनन्दवर्धनमते तु काव्ये ध्वनिः एव प्रधानः भवति। सप्तदश शतकवर्त्ती तामिळनाडुप्रदेशीयः अप्पयदीक्षितः कुवलयानन्दग्रन्थं विलिख्य आलङ्कारिकेषु अग्रस्थानं लब्धवान्। एकादशशतकवर्त्ती काश्मीरीयः मम्मटाचार्यः काव्यप्रकाशं विरच्य अलङ्कारसाहित्ये महतीं ख्यातिम्

अर्जितवान्। प्रायः द्वादशशतकवर्त्ती मालवदेशीयः भोजराजः सरस्वतीकण्ठाभरणम् इति ग्रन्थं विरचितवान्। चतुर्दशशतकीयः उत्कलदेशीयः पण्डितप्रवरः विश्वनाथः साहित्यदर्पणं रचितवान्। स च ग्रन्थः सम्प्रति अतीव जनप्रियः विद्यते। वाराणसीस्थः सप्तदशशतकवर्त्ती पण्डितराजः जगन्नाथः रसगङ्गाधरं रचितवान्। प्रायः अयम् एव अलङ्कारग्रन्थः अन्तिमः वर्तते। जगन्नाथस्य ग्रन्थं न कोऽपि खण्डयितुं समर्थः भवति।

पाठगतप्रश्नानाम् उत्तराणि

१. ८५५ – ८८३ ई.।
२. काश्मीरदेशः।
३. नोणभट्टः।
४. ध्वन्यालोकग्रन्थम्।
५. आनन्दवर्धनः।
६. १२९।
७. सप्तदश शतकम्।
८. तामिळनाडुप्रदेशः।
९. रङ्गराजाध्वरीन्द्रः।
१०. कुवलयानन्दः।
११. चन्द्रालोकम्।
१२. २७३।
१३. द्वौ परिच्छेदौ।
१४. चित्रमीमांसाखण्डनम्।
१५. प्रथमवेङ्कटः।
१६. राजानकः।
१७. एकादशशतकम्।
१८. काश्मीरदेशः।
१९. जैयटः।
२०. काव्यप्रकाशः।
२१. दश उल्लासाः।
२२. १४३ कारिकाः।
२३. वाराणस्याम्।
२४. मालवदेशः।
२५. एकादशशतकम्।
२६. भोजराजः।
२७. पञ्च परिच्छेदाः।
२८. षट्त्रिंशत् प्रकाशाः।
२९. शृङ्गाररसः।
३०. भोजराजः।
३१. उत्कलदेशीयः।
३२. चतुर्दश शतकम्।
३३. श्रीचन्द्रशेखरः।
३४. नारायणदासः।
३५. दश परिच्छेदाः।
३६. पुष्पमालाम्, भाषार्णवम्।
३७. काव्यप्रकाशस्य दीपिकां टीकाम्।
३८. सप्तदशशतकम्।
३९. वाराणसी।
४०. जगन्नाथः।
४१. द्वे आनने।
४२. पेरुभट्टः।
४३. लक्ष्मीदेवी।

छात्राणां बोधसौकर्याय आलङ्कारिकाणां देशकालकृतिविषये काचित् तालिका प्रदीयते।

नाम	देशः	कालः	कृतिः
आनन्दवर्धनः	काश्मीरः	नवमशतकम्	ध्वन्यालोकः
अप्पयदीक्षितः	तामिळनाडुप्रदेशः	सप्तदशशतकम्	कुवलयानन्दः
मम्मटाचार्यः	काश्मीरः	एकादशशतकम्	काव्यप्रकाशः
भोजराजः	मालवप्रदेशः	द्वादशशतकम्	सरस्वतीकण्ठाभरणम्
विश्वनाथः	उत्कलप्रदेशः	चतुर्दशशतकम्	साहित्यदर्पणः
जगन्नाथः	वाराणसी	सप्तदशशतकम्	रसगङ्गाधरः

॥ इति एकविंशः पाठः ॥